श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ॥
छात्रं श्वित्रिक्रिमिघ्नं रक्तपित्तहरं गुरु ।
आर्घ्यं चक्षुष्यमायुष्यं कफपित्तामवातजित् ॥
औद्दालकं कषायोष्णं कटुकुष्ठविषापहम् ।
दालं कफहरं रूक्षं दीपनं छर्दिमेहनुत् ॥
उष्णसुष्णार्त्तमुष्णे च हन्यात्मधु विषान्वयात् ।
मधुन्युष्णैर्विरुध्यन्ते वर्ज्यमित्यार्षसंस्थितम् ॥"
उष्णैः रौद्रैः करणैः उष्णं मधु उष्णार्त्तं रौद्रपीड़ितं जनं विषान्वयात् विषतुल्यत्वात् हन्यात् ॥ * ॥ नवपुराणमधुगुणाः ।
"बृंहणीयं मधु नवं वातश्लेष्महरं परम् ।
पुराणं लघु संग्राहि निर्दोषं स्थौल्यनाशनम् ॥
दोषत्रयहरं पक्वमामसम्लं त्रिदोषकृत् ॥"
अत्र केचिन्मधुनोऽग्निसंयोगाभावात् काञ्जपक्वतामाहुः ॥ * ॥ मधुजातशर्कराशुणाः ।
"मधुजा शर्करा रूक्षा तृष्णाच्छर्द्यतिसारजित् ।"
इति राजवल्लभे मधुवर्गः ॥ * ॥
अपि च ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
नानापुष्परसाहाराः कपिला वनमक्षिकाः ।
याः स्थूलास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ॥
ये स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः ।
भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ॥
पिङ्गला मक्षिकाः सूक्ष्माः क्षुद्रा इति हि विश्रुताः ।
ताभिरुत्पादितं यत्तु तत् क्षौद्रं मधु कथ्यते ॥
महत्यो मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धीमद्भिः पौत्तिकं समुदाहृतम् ॥
छत्राकारन्तु पटलं वरटाः पीतपिङ्गलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधुच्छात्रकमीरितम् ॥
मक्षिकास्तीक्ष्णतुण्डा याः पीताः षट्पदसन्निभाः ।
तदुद्भूतं यदर्घ्याह्वं तदार्घ्यं मधु भण्यते ॥
उद्दालाः कपिलाः कीटा भूमेरुद्गताः स्मृताः ।
वल्मीकान्तस्तदुत्पन्नमौद्दालकमुदीर्य्यते ॥
इन्द्रनीलदलाकाराः सूक्ष्माश्चिन्वन्ति मक्षिकाः ।
यद्वृक्षकोटरान्तस्तन्मधु दालमिदं क्रमात् ॥
इत्येतस्याष्टधा भेदैरुत्पत्तिः कथिता क्रमात् ।
अथ वक्ष्याम्यहं तेषां वर्णवीर्य्यादिकं क्रमात् ॥"
तद्यथा,—
माक्षिकं तैलवर्णं स्यात् श्वेतं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतसन्निभम् ॥
आपीतवर्णं छत्रं स्यात् पिङ्गलञ्चार्घ्यनामकम् ।
औद्दालं स्वर्णवाडस्रमापीतं दालमुच्यते ॥
माक्षिकं मधुरं रूक्षं लघु श्वासादिदोषनुत् ।
भ्रामरं पिच्छिलं रूक्षं मधुरं मुखजाड्यजित् ॥
क्षौद्रन्तु शीतं चक्षुष्यं पिच्छिलं पित्तवातहृत् ।
पौत्तिकं मधु रूक्षोष्णं श्रमसपित्तदाहहृत् ॥
श्वित्रमेहक्रमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ।
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तादिदोषहृत् ॥
औद्दालकन्तु कुष्ठादिदोषघ्नं सर्व्वसिद्धिदम् ।
दालं कटु कषायाम्लं मधुरं पित्तदायि च ॥
नवं मधु भवेत् स्थौल्यं नातिश्लेष्महरं परम् ।
देहस्थौल्यापहं ग्राहि पुराणं मधु लेखनम् ॥
पक्वं दोषत्रयघ्नं मधु विविधरुजाजाड्यजिह्मामयादिध्वंसं धत्ते च रुच्यं बलमतिधृतिदं वीर्य्यवृद्धिं विधत्ते ।
आमञ्चेदामगुल्मामयपवनरुजापित्तदाहास्रदोषनाशं नूनं विशोषं जनयति नयति ध्वंसमप्यङ्गवृद्धेः ॥
व्रणशोधनसन्धाने व्रणसंरोपणादिषु ।
साधारण्यान्मधु हितं तत्तुल्या मधुशर्कराः ॥
उष्णं सहोष्णं काले वा स्वयमुष्णमथापि वा ।
आमं मधु मनुष्याणां विषवत्तापदायकम् ॥
कीटकादियुतमम्लदूषितं
यच्च पर्य्युषितकं मधु स्मृतः ।
काष्ठकोटरगतञ्च भेचकं
तच्च गेहजनितञ्च दोषकृत् ॥
दृष्ट्वा निहत्य यदुपात्तमपास्य दंशांस्ताद्विधं मधु रसायनयोगयोग्यम् ।
हिक्कागुदाङ्कुरविशोषकफव्रणादिदोषापहं भवति दोषदमन्यथा चेत् ॥
माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणास्तस्य शर्कराः ।
विशेषाद्बलदव्या च तर्पणं क्षीणदेहिनाम् ॥"
इति राजनिर्घण्टः ॥*॥*॥
मतान्तरे मधुगुणाः ।
"मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्यं व्रणशोधनरोपणम् ॥
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ॥
वर्ण्यं मेधाकरं वृष्यं विषदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ।
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयांस्तु योगवाह्यल्पवातलम् ॥"*॥
अथ मधुभेदाः ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥"*॥
अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
"मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ॥"*॥
अथ भ्रामरस्य ।
"किञ्चित् सूक्ष्मैः प्रसिद्धेभ्यः पुष्पेभ्यः अलिभिश्चितम् ।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् ॥*॥"
अथ क्षौद्रस्य ।
"मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥"
अथ पौत्तिकस्य ।
"याः कृष्णा मशकोपमा लघुतराः प्रायो महापिच्छिलं
वृक्षाणां लघुकोटरान्तरगताः पुष्पासवं कुर्व्वते ।
तास्तज्ज्ञैरिह पुत्तिका निगदितास्ताभिः कृतं सर्पिषा
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्त्तितं पौत्तिकम् ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत् ।
विदाहि मेहकृच्छ्रघ्नं ग्रन्थ्यादिक्षतशोषि च ॥"
अथ छात्रस्य ।
"वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत् तर्पणञ्च गुणाधिकम् ॥"
अथार्घ्यस्य ।
"मधूकवृक्षा निर्यासं शरत्काले श्रमोद्भवाः ।
स्रवन्त्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः ॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः ॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ॥"*॥
अथौद्दालकस्य ।
"प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः ।
कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ॥"*॥
अथ दालस्य ।
"संस्रुत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं छर्द्दिप्रमेहजित् ॥
अधिकं मधुरं स्निग्धं बृंहणं गुरुभारिकम् ॥"
लघु पाके । गुरुभारिकं तुलितम् ॥ * ॥ अथ नवपुराणमधुगुणाः ।
"नवं मधु भवेत् पुष्टै नातिश्लेष्महरं सरम् ।
पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुड़स्यापि विशेषतः ।
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ॥"
अथ मधुनः शीतस्य गुणाधिक्यमुष्णतायां निषेधः ।
"विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्व्वन्ति तच्छीतं गुणवन्मधु ॥